# श्रीमद् भागवत रसिक कुटुंब

## अथ वंदनम्, श्रीमद्भागवतमाहात्म्यम्, मंगलाचरण

### अथ वंदनम्

**सर्गस्थितिनिरोधार्थं(ङ्), कामाकाममयो हि यः।**

**तं(ङ्) कामं(ङ्) कामकामघ्नं(ङ्) , कामाभावाय कामये॥1॥**

**यत्कामिनीकेलिकलापकुण्ठितः(ख्), कामोप्यकामा  विमदो बभूव ह।**

**तं मानिनीमानदमानदं  सदा , श्रीमोहनं मोहनमानतोऽस्म्यहम्॥2॥**

**यस्याङ्घ्रिपंकजपरागपरप्रभावाद्,भूत्वा कृती कृतिमतां सृतिमाचरामि।**

**तं सद्गुरुं सततसर्वसुखं सदग्र्यं(वँ),  वंदे सदा विमलबोधघनं(वँ) विचित्रम्॥3॥**

**व्यासं(वँ) व्यासकरं(वँ) वन्दे, मुनिं(न्) नारायणं स्वयम् ।**

**यतः(फ्) प्राप्तकृपालोका, लोका मुक्ताः(ख्) कलेर्ग्रहात्॥4॥**

**यस्य तुण्डाच्च्युतश्चूतो, राजतेऽयं रसात्मकः।**

**तमच्युतकथाकुञ्जे, सुकूजन्तं शुकं भजे॥5॥**

**श्रीधरं श्रीधरं(वँ) वंदे , श्रीधरैकपरायणम्।**
**यस्यैव श्रीप्रसादेन , श्रीधरेयं(ङ्) कृतिः(ख्) कृता॥6॥**

**राधा भक्तिर्हरिर्ज्ञानं(न्), ताभ्यां(यँ) या च समन्विता ।**
**तां श्रीभागवतीं(ङ्) गाथां(वँ), वन्दे युगलरूपिणीम्॥7॥**

## श्रीमद्भागवतमाहात्म्यम्

**सच्चिदानंदरूपाय, विश्वोत्पत्त्यादिहेतवे।**
**तापत्रयविनाशाय, श्रीकृष्णाय वयं(न्) नुमः ॥1॥**

**श्रीसच्चिदानन्दघनस्वरूपिणे , कृष्णाय चानन्तसुखाभिवर्षिणे ।**
**विश्वोद्भवस्थाननिरोधहेतवे, नुमो वयं भक्तिरसाप्तयेऽनिशम् ॥2॥**

## मंगलाचरण

**ॐ नमो भगवते वासुदेवाय**

**जन्माद्यस्य यतोऽन्वयादितरतश्- चार्थेष्वभिज्ञः(स्) स्वराट्**
**तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।**
**तेजोवारिमृदां(यँ) यथा विनिमयो यत्र त्रिसर्गोऽमृषा**
**धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं(न्) धीमहि ॥1॥**

**धर्मः(फ्) प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां(वँ)**

**वेद्यं(वँ) वास्तवमत्र वस्तु शिवदं(न्) तापत्रयोन्मूलनम् ।**

**श्रीमद्भागवते महामुनिकृते किं(वँ) वा परैरीश्वरः(स्)**

**सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः(श्) शुश्रूषुभिस्तत्क्षणात् ॥2॥**

**निगमकल्पतरोर्गलितं फलं**

**शुकमुखादमृतद्रवसंयुतम् ।**

**पिबत भागवतं रसमालयं**

**मुहुरहो रसिका भुवि भावुकाः ॥3॥**